श्री विश्वनाथाष्टकं

श्री विश्वनाथाष्टकं

गंगातरंगरमणीयजटाकलापं
गौरीनिरंतरविभूषितवामभागं |
नारायणप्रियमनंगमदापहारं
वाराणसीपुरपतिं भज विश्वनाथं || 1 ||

वाचामगोचरमनेकगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठं | [पद्मं]
वामेन विग्रहवरेण कलत्रवंतं
वाराणसीपुरपतिं भज विश्वनाथं || 2 ||

भूताधिपं भुजगभूषणभूषितांगं
व्याघ्राजिनांबरधरं जटिलं त्रिनेत्रं |
पाशांकुशाभयवरप्रदशूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथं || 3 ||

शीतांशुशोभितकिरीटविराजमानं
फालेक्षणानलविशोषितपंचबाणं |
नागाधिपारचितभासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथं || 4 ||

पंचाननं दुरितमत्तमतंगजानां
नागांतकं दनुजपुंगवपन्नगानां |
दावानलं मरणशोकजराटवीनां
वाराणसीपुरपतिं भज विश्वनाथं || 5 ||

तेजोमयं सगुणनिर्गुणमद्वितीयं
आनंदकंदमपराजितमप्रमेयं |
नागात्मकं सकळनिष्कळमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथं || 6 ||

आशां विहाय परिहृत्य परस्य निंदां
पापे रतिं च सुनिवार्य मनः समाधौ |
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथं || 7 ||

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशांतिनिलयं गिरिजासहायं |
माधुर्यधैर्यसुभगं गरळाभिरामं
वाराणसीपुरपतिं भज विश्वनाथं || 8 ||

वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः |
विद्यां श्रियं विपुलसौख्यमनंतकीर्तिं
संप्राप्य देहविलये लभते च मोक्षं || 9 ||

इति श्रीविश्वनाथाष्टकं |